॥ ६० ॥ ॐ ह्रीं श्रीमद्भट्टारकप्रलब्धिविजयकीर्तिगुरवे नमः ॥ अथ द्रव्यसंग्रहटीका ॥ नत्वा जिनार्कमपहस्तितसर्वदोषं लोकत्रयाधिपतिसंस्तुतपादपद्मं ज्ञानप्रभा २
प्रकटिताखिलवस्तुसार्थं षड्द्रव्यनिर्णयमहं प्रकटं प्रवक्ष्ये ॥ १ ॥ टीका ॥ अहं प्रवक्ष्ये कथयिष्ये किं षड्द्रव्यनिर्णयं षण्णां द्रव्याणां जीवादीनां निर्णयं निश्चयस्तं कथं प्र-
वक्ष्ये प्रकटं यथा स्यात्तथा किं कृत्वा पूर्वं नत्वा नमस्कृत्य कं जिनार्कं जिनादित्यं कथंभूतं अपहस्तितसर्वदोषं अपहस्तिता निराकृताः सर्वे रागद्वेषादयो दोषा येन
स अपहस्तितसर्वदोषस्तं आदित्ये त्वादित्यपक्षे अपहस्तितसर्वदोषस्तं आदित्यस्यापि अपहस्तिताः निराकृताः सर्वे दोषा रात्रिः पुनः कथंभूतं लोकत्रयाधिपतिसंस्तुतपा २
दपद्मं लोकत्रयस्याधिपतयः स्वामिनो धरणेंद्रनरेंद्रसुरेंद्रास्तैर्वंदितौ पादावेव पद्मौ यस्य स लोकत्रयाधिपतिसंस्तुतपादपद्मस्तं आदित्येऽपि लोकत्रयाधिपतिभिः ब्र-
ह्माविष्णुमहेश्वरैः संस्तुतपादपद्म इति परसमयवचनं पुनः कथंभूतं ज्ञानप्रभाप्रकटिताखिलवस्तुसार्थं ज्ञानं केवलज्ञानं तदेव प्रभा तया प्रकटिः प्रकाशिता अखि-
लवस्तूनां निखिलपदार्थानां सार्थाः समूहा येन स ज्ञानप्रभाप्रकटिताखिलवस्तुसार्थस्तं आदित्येनापि प्रभालोचनगोचराः सर्वे पदार्थाः प्रकटिता इति क्रियाकार-
कसंबंधः अथेष्टदेवताविशेषं नमस्कृत्य अहं मुनिः सैद्धांतिकश्रीनेमिचंद्र इति पादितानां षड्द्रव्याणां स्वल्पबोधप्रबोधार्थं संक्षेपार्थतया विवरणं करिष्ये ॥ गाथा ॥ जी-
वमजीवं दव्वं जिणवरवसहेण जेण णिद्दिट्ठं देविंदविंदवंदं वंदे तं सव्वदा सिरसा ॥ १ ॥ अहं तं जिनवरं वंदे नमस्करोमि कथंभूतं देविंदविंदवंदं देवानामिंद्रा देवेंद्रास्ते-
षां वृंदाः समूहास्तेषां वंद्यः पूज्यस्तं कदा वंदे सर्वदा सर्वकालं यावत्सरागपरिणतिस्तावद्वंदे न वीतरागावस्थायां तदात्मन एतत्पदप्राप्तेर्न कस्यापि कोऽपि वंद्यः अ-
तीतानागतवर्तमानकाले वा केन वंदे सिरसा मस्तकेन तं कं वंदे जेण जिणवरवसहेण णिद्दिट्ठं येन जिनवरवृषभेण निर्दिष्टं प्रतिपादितं जिनवरा गणधरदे-
वादयस्तेषां मध्ये वृषभः प्रधानः अथवा जिनवरश्चासौ वृषभनाथश्च तेन जिनवृषभेण किं निर्दिष्टं जीवमजीवं दव्वं जीवद्रव्यमजीवद्रव्यं च जीवशब्दस्य कोऽर्थः व्युत्प-
त्तिः व्यवहारनयेन दशभिः प्राणैः सह जीवति वर्तमानकाले जीविष्यति भविष्यत्काले जीवितपूर्वो अतीतकाले निश्चयनयेन चतुर्भिः प्राणैः सत्तासुखबोधचैत-
न्यैः जीवति स जीवस्तस्य प्राणानाह पंचविइंदियपाणा मणवचिकायाणतिण्णिबलपाणा आणप्पाणप्पाणा आउगपाणेण होंति दहपाणा इति जीवः अजीव १

गुण अस्तित्वं वस्तुत्वं द्रव्यत्वं प्रमेयत्वं अगुरुलघुत्वं प्रदेशत्वं अचेतनत्वं अमूर्तत्वं चेति ॥

द्रव्यं किंस्वरूपं पुद्गलधर्माधर्माकाशकालरूपं द्रव्यस्य किं लक्षणं द्रवति द्रोष्यति अदुद्रुवदिति द्रव्यं द्रवति पर्यायं गच्छति द्रोष्यति पर्यायं यास्यति अदुद्रुवदिति पर्यायं गतवत्पूर्वं
तदपि गुणपर्यायवत् गुणपर्याययावत् तद्द्रव्यं अन्वयेन सहसंभवा गुणाः व्यतिरेकिणो भिन्नाः पर्यायाः ते च गुणा द्विभेदाः साधारणाः असाधारणाश्च पर्याया उत्पादव्ययरू-
पाः तत्र जीवस्य साधारणाः अस्तित्वं वस्तुत्वं द्रव्यत्वं प्रमेयत्वं अगुरुलघुत्वं प्रदेशत्वं चेतनत्वं अमूर्तत्वं चेति असाधारणाः सम्यग्दर्शनज्ञानचारित्रसुखानि पर्यायाः देवम-
नुष्यनारकतिर्यक्त्वे एकेंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रियपंचेंद्रिया इति पुद्गलः तथा च जलानलादिभिर्नानायोनिषु याति स पुद्गलः इति वचनात् स च द्विविधः अणुरूपः
स्कंधरूपश्च अत्र साधारणगुणाः अस्तित्वं वस्तुत्वं द्रव्यत्वं प्रमेयत्वं अगुरुलघुत्वं प्रदेशत्वं अचेतनत्वं मूर्तत्वं चेति असाधारणाः स्पर्शरसरूपगंधवर्णाः पर्यायमलजपूर-
णस्वभावाः घटितस्य पुनः स्तंभादेः गलनपूरणं नास्ति कथं नास्ति संप्रति स्तंभं तं उनास्तं तस्य मानं गृह्यते वर्षशतेनापि पुनस्तन्मात्रं स्तंभो स्थितानां दृश्यते धर्मद्रव्यस्य सा-
द्रव्यसं० धारणगुणाः अस्तित्वं वस्तुत्वं प्रमेयत्वं अगुरुलघुत्वं प्रदेशत्वं अमूर्तत्वमचेतनत्वं चेति असाधारणाः जीवपुद्गलयोर्गतिसहकारित्वं पर्याया उत्पादव्ययाः अधर्म-
द्रव्यस्य साधारणगुणाः अस्तित्वं वस्तुत्वं द्रव्यत्वं प्रमेयत्वं अगुरुलघुत्वं प्रदेशत्वममूर्तत्वमचेतनत्वं चेति असाधारणाः जीवपुद्गलयोः स्थितिसहकारित्वं पर्याया उ-
त्पादव्ययाः कालद्रव्यस्य साधारणगुणाः अस्तित्वादयः पूर्वोक्ता ज्ञातव्याः असाधारणाः द्रव्याणां परिणमयितृत्वं आकाशद्रव्यस्य साधारणगुणाः अस्तित्वं व-
स्तुत्वं द्रव्यत्वं अमूर्तत्वं प्रदेशत्वं अचेतनत्वं चेति असाधारणाः सकलपदार्थानामवकाशदायकं इति प्रतिपादिते सति उत्पादव्ययध्रौव्यात्मकं वस्तु इति प्रतिपादितं
इदानीं जीवस्य स्वरूपमाह ॥ गाथा ॥ जीवो उवओगमओ अमुत्ति कत्ता सदेहपरिमाणो भोत्ता संसारत्थो सिद्धो सो विस्ससोड्ढगई ॥ २ ॥ टीका ॥ जीवोऽस्ति चेतनालक्षणः
स्वपरस्वरूपसंवेदकः तथा उवओगमओ उपयोगमयः ज्ञानदर्शनलक्षणोपयोगेन युक्तः अनेन प्रद्वतिगुणज्ञानोदयस्य पास्तं मोहज्ञानाद्यभाव इति च तथा अमुत्ति
अमूर्तिः कर्मनोकर्मभिः सर्वदा संबंधेऽपि न च मूर्तिः स्वकीयस्वभावत्वात् अमूर्तस्वरूपअपरित्यागात् तथा कत्ता कर्ता केषां कर्मणां तद्भिन्नात्मपरिणामानां च
कर्ता अनेन परस्वरूपकर्मकर्तृत्वं नात्मनः इत्येकांतो निरस्तः तथा सदेहपरिमाणो स्वदेहप्रमाणो नामकर्मोदयवशादुपात्ताणुमहच्छरीरप्रमाणोऽन्यूनोना

घुषिकः अनेनात्मनः सर्वगत्वं वटकणिकामात्रत्वं च प्रत्याख्यातं तथा सोत्तालोकाकेषां शुभाशुभकर्मसंपादितेष्टानिष्टविषयाणां तत्फलभवरूपं स्वयं परिणामानां
च तथा संसारस्थो त्रसस्थावरपर्यायैर्युक्तः संसारे संसरतीति तथा सिद्धो सो यः प्रागुक्तः सकलकर्मक्षयात् सिद्धो भवति पुनः किंविशिष्टः विस्ससोड्ढगई सिद्धः सर्व
वश्वरूपेणो ऊर्ध्वं गच्छति अथवा विश्वस्वरूपत्वेनोर्ध्वं गच्छति किंवत् एरंडबीजवत् अग्निशिखावत् जलमध्ये अलाबुकवदिति अनेन यत्रैव मुक्तस्तत्रैव स्थित
इति निरस्तो औदारिकवैक्रियिकाहारकतैजसकार्मणशरीराणि नोकर्म स जीवो व्यवहाररूपतया परमार्थरूपतया च द्विविधं जल्पते इत्याह ॥गाथा॥ तिक्का
ले चदुपाणा इंदियबलमाउ आणपाणो य ववहारा सो जीवो णिच्छयणयदो दु चेदणा जस्स ॥टीका॥ व्यवहारात् स जीवो व्यवहारनयापेक्षया स जीवो लक्ष्यते
सकः यस्य विद्यते केते चत्वारः प्राणाः किंनामानः इंदियबलमाउ आणपाणो य इंद्रियप्राणः बलप्राणः आयुःप्राणः आनपानश्च एवं चत्वारो भेदेन पुनर्द
शकाथं पंचविंदियादि गाथा पंचमसूत्रव्याख्याने प्रथमोक्तं इंद्रिय पंचेंद्रियसंज्ञिजीवापेक्षया प्रतिपादितं न पुनः सर्वजीवापेक्षया कस्मिन्काले ते चत्वारः प्राणा भव
ति तिक्काले अतीतानागतवर्तमाने कालत्रयेऽपि एकेंद्रियाद्यपेक्षया विकल्पः णिच्छयणयदो दु निश्चयनयात् पुनः चेयणा जस्स चेतना यस्य सो जीवः स जीवस्य
पयोगद्वयमाह ॥गाथा॥ उवओगो दुवियप्पो दंसणणाणं च दंसणं चदुधा चक्खुअचक्खू ओही दंसणमध केवलं णेयं ॥टीका॥ उवओगो दुवियप्पो उपयोगो द्वि
विधः द्विविकल्पः कथमित्याह चक्खुअचक्खू ओही चक्षुर्दर्शनं अचक्षुर्दर्शनं अवधिदर्शनं अथ केवलं केवलदर्शनं चेति णेयं ज्ञातव्यमिति अत्र चक्षुर्दर्शनं
एकप्रकारं अचक्षुर्दर्शनं स्पर्शरसगंधश्रोत्रभेदाच्चतुर्विधं ज्ञानमष्टविकल्पं भवतीत्याह ॥गाथा॥ णाणं अट्ठवियप्पं मदिसुदिओही अणाणणाणाणि मणपज्जय के
वलमवि पच्चक्खपरोक्खभेयं च ॥टीका॥ णाणं अट्ठवियप्पं ज्ञानमष्टविकल्पं भवति कथं मदिसुदिओही अणाणणाणाणि मणपज्जय केवलमवि मतिश्रुताव
वधिज्ञानानि कथंभूतानि मत्यज्ञानं श्रुतज्ञानं विभंगज्ञानमज्ञानि मनःपर्ययं केवलमथानंतरं तत्र विशिष्टमत्यावरणकर्मक्षयात् इंद्रियैर्मनसा च यज्ज्ञायते तन्मति
ज्ञानं षट्त्रिंशत्त्रिशतभेदाः ३३६ किंविशिष्टश्रुतज्ञानावरणक्षयोपशमेन शृणोति रूपमाणं श्रुतं यज्ज्ञानात्तद्भवति श्रुतज्ञानं तन्मतिपूर्वकं कार्यं यथा [illegible]

पूर्वकः तदपि भेदमनेकभेदं च पो भेदैः तावच्यते अंगबाह्यमंगप्रविष्टं च अंगबाह्यमनेकविधं केः दशवैकालिकोत्तराध्ययनादि [illegible] प्रकीर्णकाः सामायि
कोत्तराध्ययनपुंडरीकांताः अंगप्रविष्टं द्वादशांगानि आचारादिरनेकभेदपर्यायादि विशिष्टावधिज्ञानावरणक्षयोपशमात् मनसो ऽवष्टंभेन यत् [illegible] परिच्छित्ति
स्वपरयोश्च पूर्वजन्मांतराणि ज्ञानाति त्रिविधप्रजन्मांतराणि तदवधिज्ञानं तद्देशावधिपरमावधिसर्वावधिभेदात्रिभेदाः विशिष्टक्षयोपशम [illegible] घाति
चतुष्टयनिर्मूलनात् वेदनीयायुर्गोत्रनामकर्माणां दग्धरज्जुवत्स्थिते यदुत्पन्नं त्रैलोक्योदरवर्तिसमस्तवस्तुयुगपत्सकलपर्यायप्रकाशं महायंत्र [illegible]
श्रुतपरोक्षं अवधिमनःपर्यये देशप्रत्यक्षे केवलं सकलप्रत्यक्षमिति तस्य जीवस्य सामान्येन व्यवहारलक्षणं विशेषेण निश्चयलक्षणं चाह [redacted]
अट्ठचदुणाणदंसणसामण्णं जीवलक्खणं भणियं ववहाराशुद्धणया सुद्धं पुण दंसणं णाणं ॥टीका॥ जीवलक्खणं भणियं
जीवानां लक्षणं स्वभावो भणितं कथंभूतं सामण्णं सामान्यं अयमर्थः केषांचिद्व्यक्तिरूपेण केषांचिच्छक्तिरूपेण विद्यमानत्वात् कदा सामान्यं ववहारणया
व्यवहारनयापेक्षया किंलक्षणं अट्ठचदुणाणदंसण अष्टप्रकारं ज्ञानं चतुःप्रकारं दर्शनं एते व्याख्याताः प्रागेव सुद्धं पुण दंसणं णाणं शुद्धनयापेक्षया शुद्धं दर
र्शनं ज्ञानं च दृष्टत्वं ज्ञातृत्वं च स च जीवो मूर्तिरहितत्वात् अमूर्तिश्चेत्याह ॥गाथा॥ वण्णरसपंचगंधादोफासाअट्ठणिच्छयाजीवे णो संति अमुत्ति तदो ववहारा मुत्ति बं
धादो ॥ [redacted] ॥टीका॥ स जीवो अमुत्ति तदो अमूर्तितः कार
णात् यस्मात् नो संति नैव विद्यंते के ते वण्णरस पंच गंधा दो फासा अट्ठ वर्णाः पंच रक्तपीतनीलकृष्णश्वेताः रसाः पंच कटुकतिक्तकषायमधुरलवणाम्लाः गंधौ
द्वौ सुरभिर्दुरभिश्च स्पर्शा अष्टौ मृदुकर्कशगुरुलघुस्निग्धरूक्षशीतोष्णाः एते न संति कदा न संति णिच्छय निश्चयनयापेक्षया ववहार व्यवहारनयापेक्षया
पुनः मुत्ति मूर्तियुक्तः कुतः बंधादो कर्मनोकर्मबंधवशात् स व्यवहारकर्त्ता परमार्थकर्त्ता च भवतीत्याह ॥गाथा॥ पुग्गलकम्मादीणं कत्ता ववहार
दो दु णिच्छयदो चेदणकम्माणादा सुद्धणया सुद्धभावाणं ॥टीका॥ स आदा आत्मा कत्ता कर्ता भवति कदा ववहारादो व्यवहारनयापेक्षया के

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

थां कर्त्ता पुग्गलकम्मादीणं पुद्गलकर्मादीनां णिच्छयदो निश्चयनयापेक्षया ड पुनः चेदणकम्माण चेतनकर्मणां क्रोधादीनां कर्त्ता शुद्धनयापेक्षया सुद्धा
वाणं शुद्धभावानां अनंतदर्शनज्ञानवीर्यसुखानां अंतरोत्तरपरूपपरिणामात्कर्त्ता सर्वथा व्यवहारतो का परमार्थतो का त्ववतीत्याह ॥गाथा॥ ववहारा सुहदुक्खं पु
ग्गलकम्मफलं पभुंजेदि आदा णिच्छयणयदो चेदणभावं खु आदस्स ॥गाथा॥टीका॥ स आदा पभुंजेदि स आत्मा प्रभुंक्ते किंतत् पुग्गलकम्मप्फलं पुद्गलसं
बंधात्कर्मणां फलं सचेतनानीकर्मणामित्यर्थः किं फलं सुहदुक्खं सुखदुःखं च कदा चेत् ववहारा व्यवहारनयापेक्षया णिच्छयणयदो निश्चयनयापेक्षया २
पुनः चेदणभावं खु आदस्स आत्मनः परमानंदस्वरूपतास्वपसुंक्ते खु स्फुटं स आत्मा व्यवहारपरमार्थापेक्षयोक्तं प्रमाण इति वदन्नाह ॥गाथा॥ अणुगु
रुदेहपमाणो [redacted] उवसंहारप्पसप्पदो चेदा असमुहदो ववहारा णिच्छयणयदो असंखदेसो वा ॥गाथा॥टीका॥ चेदा ववहार अणुगुरुदेह
पमाणो स आत्मा व्यवहारनयमाश्रित्य सूक्ष्मस्थूलदेहप्रमाणो यदा कर्मवशात् कुंथुपर्यायं गृह्णाति तदा तद्देहप्रमाणः यदा हस्तिपर्यायं गृह्णाति तदा तद्देहप्र
माणः कुतः उवसंहारप्पसप्पदो उपसंहारप्रसर्पणात् यत उपसंहारविस्तारधर्मी आत्मा कोऽत्र दृष्टांतः यथा प्रदीपो महाभाजनप्रच्छादितस्तद्भाज
नांतरं प्रकाशयति लघुभाजनप्रच्छादितस्तद्भाजनांतरं प्रकाशयतीति किंतु असमुहदो समुद्घातसप्तकवर्जितत्वात्तत्राणुगुरुत्वाभावः समुद्घा २
तलक्षणमाह ॥गाथा॥ वेयणकसायविउव्वणमारणंतिओ समुग्घाउ तेजाहारो छट्ठो सत्तमओ केवलीणं तु ॥गाथा॥टीका॥ समुद्घातलक्षणमाह मूलशरीर
मछंडियउत्तरदेहस्स जीवपिंडस्स णिग्गमणं देहादो हवदि समुग्घादयं णामं तत्स्वरूपं यथा तीव्रवेदनानुभवान्मूलशरीरमत्यक्त्वा आत्मप्रदेशानां बहिर्नि
र्गमनमिति वेदनासमुद्घातः ॥१॥ तीव्रकषायोदयान्मूलशरीरमत्यक्त्वा परस्य घातार्थमात्मप्रदेशानां बहिर्निर्गमनमिति कषायसमुद्घातः ॥२॥ मूलशरीर
मत्यक्त्वा किमपि विकुर्वयितुमात्मप्रदेशानां बहिर्निर्गमनमिति विकुर्वणसमुद्घातः ॥३॥ मारणांतिकसमये मूलशरीरमत्यक्त्वा यत्र कुत्रचिद्बद्धमायुस्तत्प्रदे
शं स्पृष्टुमात्मप्रदेशानां बहिर्निर्गमनमिति मारणांतिकसमुद्घातः ॥४॥ स्वस्य मनोनिष्टजनकं किंचित्कारणांतरमवलोक्य समुत्पन्नक्रोधस्य संयमनिधा ३

नस्य महामुने मूलशरीरमत्यज्य सिंदूरपुंजप्रभो दीर्घत्वेन द्वादशयोजनप्रमाणः सूच्यंगुलसंख्येयभागमूलविस्तारः नवयोजनाग्रविस्तारः काहलाकृतिपुरुषो ३
वामस्कंधान्निर्गत्य वामप्रदक्षिणेन हृदि निहितं विरुद्धं वस्तु भस्मसात्कृत्य तेनैव संयमिना सह स च भस्मतां व्रजति द्वीपायनवत् असावशुभस्तैजसः समुद्घातः लोकं
व्याधिदुर्भिक्षादिपीडितमवलोक्य समुत्पन्नकृपस्य परमसंयमनिधानस्य महर्षेर्मूलशरीरमत्यज्य शुभाकृतिः प्रागुक्तदेहप्रमाणः पुरुषो दक्षिणस्कंधान्निर्गत्य द
क्षिणप्रदक्षिणेन व्याधिदुर्भिक्षादिकं स्फोटयित्वा पुनरपि स्वस्थाने प्रविशति असौ शुभरूपस्तैजससमुद्घातः ॥५॥ समुत्पन्नपदपदार्थभ्रांतेः परमर्द्धिसंपन्नस्य मह
र्षेर्मूलशरीरमत्यज्य शुद्धस्फटिकाकृतिरेकहस्तप्रमाणः पुरुषो मस्तकमध्यान्निर्गत्य यत्र कुत्रचिदंतर्मुहूर्त्तमध्ये केवलज्ञानिनं पश्यति तद्दर्शनाच्च स्वाश्रयस्य
मुनेः पदपदार्थनिश्चयं समुत्पादयित्वा पुनः स्वस्थाने प्रविशति असावाहारसमुद्घातः ॥६॥ सप्तमः केवलिनां दंडकपाटप्रतरपूरणः स केवलिसमु
द्घातः ॥७॥ णिच्छयणयदो निश्चयनयापेक्षया असंखदेसो वा असंख्यातो लोकमात्र वा शब्दोऽत्र स्फुटवाची इत्युक्तात् स्वदेहप्रमाणप्रतिपादितजीवलक्ष
२८ णं अनंतानंतजीवास्ते च संसारावस्थायां वर्त्तंत इत्याह ॥गाथा॥ पुढविजलतेउवाऊवणप्फदी विविहथावरेइंदी विगतिगचउपंचक्खा तसजीवा होंति संखादी ॥
॥११॥ समणा अमणा णेया पंचेंदिय णिम्मणा परे सव्वे बादरसुहमेइंदिय सव्वे पज्जत्त इदरा य ॥१२॥टीका॥युग्मं॥ पुढविजलतेउवाऊवणप्फदी पृथिवीकायिकाः
अप्कायिका तेजःकायिका वातकायिका वनस्पतिकायिकाश्च विविहथावरेइंदी एते विधाः स्थावरा एकेंद्रियाः एतेषां कीदृशं स्वरूपं [illegible]
सायसमुन्नाया जारिसया तारिसया जीवा एगेंदिया णेया एतेषामत्र अपि समारोप्य प्राणाः कथ्यंते तदेकेंद्रियस्य कति प्राणाः स्पर्शनेंद्रियप्राणः कायब
लप्राण उच्छ्वासनिश्वासप्राण आयुःप्राणश्चेति चत्वारः ते चैकेंद्रिया बादराः सूक्ष्माः पर्याप्ता अपर्याप्ताश्च एतेषां लक्षणं कथ्यंते वागोचराः स्थूलाश्चिरस्था २
यिनो बादराः अवाग्गोचराः सूक्ष्माः प्रतिक्षणविनाशिनः सूक्ष्माः सप्रतिघाता बादराः परैर्मूर्त्तद्रव्यैर्बाध्यमाना इत्यर्थः अप्रतिघाताः सूक्ष्माः परैर्मूर्त्तद्रव्यैरबाध्य
मानाः पर्याप्तापर्याप्तयोः स्वरूपमाह आहारशरीरेंद्रियप्राणाश्चत्वारः अपर्याप्तयः भाषामनसोरावर्णीयं पर्याप्तस्य एकमपि परिपूर्णाः विगतिगचउपंचक्खा ॥

= त्रो

सजीवा होंति संखादी द्वित्रिचतुःपंचेंद्रियास्त्रसजीवा शंखादयो ज्ञेयाः अत्र द्वींद्रियाः शंखादयः एतेषां कति प्राणाः षट्प्राणाः पूर्वोक्ताश्चत्वारो रसनवाक्
ते पर्याप्ताः अत्र पर्याप्तस्य आहारशरीरस्पर्शनेंद्रियानप्राणभाषाः पंच मनसो अभावः अपर्याप्तस्य चत्वारः पर्याप्तयो भाषाया अभावः त्रींद्रियाः कुंथुमत्कुणादयः प्रा
णाः सप्त पूर्वोक्ताः षट् घ्राणप्राणश्च एते पर्याप्तापर्याप्ताः अत्र पर्याप्तस्य पर्याप्तयः पंच मनसो अभावः अपर्याप्तस्य पूर्ववच्चत्वारः पंचेंद्रियस्य संज्ञिनः प्राण २
दश पूर्वोक्ता नव मनोबलप्राणश्च एते पर्याप्तापर्याप्ताश्च पर्याप्तस्य पर्याप्तयः षट् अपर्याप्तस्य पर्याप्तयश्चत्वारः भाषायां मनसो अभावः ते च जीवाः समनस्क २
अमनस्काश्च भवंतीत्याह ॥ गाथा ॥ समणा अमणा णेया पंचेंद्रिया समनस्का अमनस्काश्च भवंति तत्र तिर्यंच समनस्का अमनस्काश्च ये अमनस्कास्ते मार :
दराययो जीअंधसमूद्रादिषु दृश्यंते णिम्मणा परे सव्वे एकेंद्रियः द्वींद्रियः त्रींद्रियः चतुरिंद्रियैति निर्मनसः ननु यदि ते अमनस्कास्तदा कथं तेषां पंचें
द्रियप्रवृत्तिर्येसामनः शब्दैकेंद्रियप्रवृत्तिरिति शास्त्रवचनं अत्रोत्तरमाह सर्वेषामेव जीवानां स्वभावत एवाहारभयमैथुनपरिग्रहस्वरूपसंज्ञाचतुष्टयं विद्य
ते एकप्रतीतिश्च दृश्यते यथा वृक्षस्य जलसिंचनाद्वृद्धिः कुठारायुधपुरुषदर्शनात्कंपः वनावरणात्राटनात्पुष्पनिर्गमो रक्तमूलप्ररोहावष्टंभेन निधानग्रहण
मिति तस्मात्तेषां मनोव्यापाररहिता प्रवृत्तिः पुनः प्रोच्यते तेषां सर्वथा मनसो भाव इति नास्ति किंतु शक्तिरूपत्वेन विद्यत एव व्यक्तिरूपत्वेन नास्ति कुतः पूर्वोपा
र्जितमतिज्ञानावरणकर्मोदयवशात्सर्वेषामपि मनसो भावो लब्धस्तदा अन्यजन्मनि मनुष्यपर्याये गृहीते सति विमनस्कत्वमायाति एवं च [illegible]
ज्ञवचनविरोधः स्यात् अतः ज्ञानतरतमया समनस्का आगमे प्रतिपादिताः तिर्यंचो विकल्पनीयाः तस्मात्कर्मोदयवशात् व्यवहारनयापेक्षया [illegible]
स्कत्वं न परमार्थतः इति विवक्षया मार्गणागुणस्थानैः संसारिणो ज्ञातव्यास्तथा इत्याह ॥ गाथा ॥ मग्गणगुणठाणेहि य चउदसहि हवंति तह असुद्धणया वि
ण्णेया संसारी सव्वे सुद्धा हु सुद्धणया ॥ टीका ॥ ते च जीवाश्चतुर्दशभिर्मार्गणास्थानैश्चतुर्दशगुणस्थानैश्च ज्ञातव्या भवंति कथंभूताः संसारिणः कथं अशुद्ध
नया अशुद्धनयापेक्षया पुनः सर्वे शुद्धाः सर्वे जीवाः शुद्धाः अनंतचतुष्टयात्मका इत्यर्थः मार्गणा आह गइ इंदियेसु काए जोये वेए कसाय णाणेय

संजम दंसण लेसा भविया सम्मत्त सण्णि आहारे ॥ ॥ अत्र गत्यादिषु जीवा अन्विष्यंते गइ देवगति मनुष्यगति नारक तिर्यंच ॥ ॥ इंदिय एकें
द्रिय बेंद्रिय तेंद्रिय चउरेंद्रिय पंचेंद्रियः ॥ ॥ अतींद्रियाः सिद्धा इत्यर्थः काए पृथ्वीकाय अपकाय तेजःकाय वातकाय वनस्पतिकाय त्र
सकाय ॥ ॥ एवं षट्काय जोए सत्यमनोयोगः मृषामनोयोगः सत्यमृषामनोयोगः न सत्यमृषा मनोयोगः सत्यवचोयोगः असत्यवचोयोगः सत्यमृषा २
वचोयोगः न सत्यमृषावचोयोगः औदारिककाययोगः औदारिकमिश्रकाययोगः परमौदारिककाययोगः ॥ ॥ च तत्रौदारिकमनुष्यतिर्यंचां २
मिश्रो पर्याप्तानां परमौदारिको केवलिनां वैक्रियककाययोगः वैक्रियकमिश्रकाययोगः तत्र वैक्रियिको देवनारकाणां मिश्रो अपर्याप्तानां आहारकका २
ययोग आहारकमिश्रकाययोग तत्र आहारककाययोग परमर्द्धिमाहात्म्यात् षष्ठगुणस्थाने महर्षीणां भवंति यथा पदपदार्थसंदेहः समुत्पद्यते तदा [illegible]
मांगपुत्तलको निर्गच्छति यत्र स्वयं तीर्थंकरदेवस्तत्र मुहूर्तमध्ये गत्वा तस्य दर्शनेन निश्चयः समुत्पद्यते पुनस्तत्रैव प्रवेशं करोति मिश्रोयं पर्याप्तस्य कार्मणका २
ययोग ॥ ॥ अयोगी च तत्र कार्मणकाययोगो विग्रहगति जीवस्य स चतुर्विधा ऋज्वी पाणिविमुक्ता लांगलिका गोमूत्रिकावत् अयोगी सिद्धः वेए स्त्रीवेदा
: पुंवेदः नपुंसकवेदाश्च अवेदाश्च कसाय क्रोधकषायिनो मानकषायिणो मायाकषायिणो लोभकषायिणो अकषायिनश्च णाणेय मतिज्ञानी श्रुत
ज्ञानी विभंगज्ञानी आभिनिबोधिकज्ञानी श्रुतज्ञानी अवधिज्ञानी मनःपर्ययज्ञानी केवलज्ञानीचेति संजम व्रतधारणं समितिपालनं कषायविनिग्रह :
अशुभ मनोवाक्कायानां त्यागः इंद्रियाणां जय इति संयमः तत्र सामायिकसंयताः छेदोपस्थापनसंयताः परिहारविशुद्धिसंयताः सूक्ष्मसांपरायशुद्धि
संयताः यथाख्यातशुद्धिसंयताः संयतासंयताः असंयताश्च तत्र सर्वसावद्यविरतिः सामायिकं पंचसु महाव्रतेषु पंचसु समितिषु त्रिषु गुप्तिषु विषये
षु समुत्पन्नदोषस्य छेदः प्रायश्चित्तमित्यर्थः छेदोपस्थापनं संयमग्रहणकालात् त्रिंशद्वर्षायुषः प्रमाणाः सन्नाष्टवर्षाणि तीर्थंकरकेवलिपादमूले प्रत्याख्यान
मधीयमानागममधीत्य प्रतिदिनं गव्यूतिद्वितयगामिनः त्रिपंचसमन्वयतयः परमवैराग्यपराः केवलिज्ञानिनां प्रकुर्वंति तदा परिहारविशुद्धिसंयमं दृढीकेव

नज्ञानीज्ञानेनावलोकयतितेषामंतरालेमृत्युरुपसर्गोवाज्ञानोत्पत्तिर्वास्यात्तदानददातियदि किमप्येतन्नस्यान्नसचत्तितदाददाति नैवेद्यं [illegible]
परस्य वैयावृत्यंकुर्वाणाः कर्मनिर्जरांकुर्वंति षष्ठमसप्तमगुणस्थानवर्तिनामेतेषामाचरणंपरिहारशुद्धिः दशमगुणस्थानवर्तिनांमुनीनांसूक्ष्मसां[illegible]
तानासावरणंसूक्ष्मसांपरायः एकादशद्वादशत्रयोदशचतुर्दशगुणस्थानवर्तिनामाचरणंयथाख्यातसंयतासंयताश्रावकाः मिथ्यात्वसासादनमिश्र
अविरतसम्यग्दृष्टयः असंयताः सिद्धाश्चदर्शनात्चक्षुदर्शनीय अचक्षुदर्शनीय अवधिदर्शनीयः केवलदर्शनीयश्चेतिलेश्या कृष्णलेश्या नीललेश्या कापोत
तेजोलेश्या पद्मलेश्या शुक्ललेश्या चेति तत्र रौद्रो वैरकरः कलहप्रियो निर्दयो धर्मरहितः कृष्णलेश्या नीललेश्या आलस्ययुक्तो नि[illegible]
विषयलंपटोज्ञानी मायी कातरोतिनिंदको वंचनपरोतितृष्णापरो नीललेश्याः सदाशुपरनिंदकोऽकार्यकारी शोककलयकुलः परपरांसवकरश्च
तत्प्रशंसकः परस्प्रतीतिरहितः आत्मानंसिवपरंमन्यते परैःस्तूयमानःसंतुष्यति संग्रामनिधनहिनज्ञानातिसंग्रामेमरणप्रार्थकः कापोतलेश्या त्यागी विकशील
दक्षः अक्रोधीश्चर्यात्युक्तः आर्यकोव्यवहारकोवृद्धकर्मी देवगुरुभक्तस्तेजोलेश्या कार्याकार्यपरिस्थापकः स्वल्पकृत्समानोदयादानरतः पंडितः
पद्मलेश्या स्तुपरपदकपातादितोनिंदानशोकभयरागद्वेषपरिवर्जितः शुक्ललेश्या इति लब्धिया सिद्धवयोभव्याजीवास्तस्माद्विपरीता अभव्या [illegible]
सम्यक्त्वरहितश्च सम्यक्त्व आप्तऋद्विद्यादितेषुपदार्थेषुजिनाज्ञयाश्रद्धाकर्मक्षीणात्तश्रद्धापरः उपशमसम्यग्दृष्टिः क्षायिकसम्यग्दृष्टिः क्षयोपशम
दृष्टिः सास्वादनसम्यग्दृष्टिः सम्यग्मिथ्यादृष्टिर्मिथ्यादृष्टिश्चेति तत्रसम्यक्त्वमध्येमिथ्यात्वस्यकिंचिदुपादानंकृतंश्रूयते यथा [illegible]
पिंतज्ञहणेलग्नस्थाति एतेमिथ्यात्वंत्रिधामिथ्यात्वसास्वादनसम्यग्मिथ्यात्वभेदात् कोदृष्टांतः यथा यंत्रमध्येनिक्षिप्ताः कोद्रवाः केचित्तुषा
दि[illegible]बंति केचिदर्धदलिताः केचित्तूर्णीभूताइति एतदेवव्याख्येयं तत्रानंतानुबंधिक्रोधमानमायालोभमिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वमिथ्या
त्वस्यप्रकृतीनामुपशमादौपशमिकसम्यग्दृष्टिः अत्रसम्यक्त्वस्यावरणोपशमोनसम्यक्त्व[illegible] सप्तानांप्रकृतीनां ५

क्षयोपशमात् क्षायिकसम्यग्दृष्टिः अनंतानुबंधादीनांषण्णांउदयाभावलक्षणक्षयात्सदवस्थोदयात्सम्यक्त्वप्रकृतेरुदयात्क्षायोपशमिकसम्यग्दृष्टिः समयात्सा
तदेमिथ्यात्वमद्याप्यनप्राप्तिरंतरालेवर्तमानःसास्वादनसम्यग्दृष्टिः सर्वेदेवावंदनीयानचनिंदनीयाइति मिश्रपरिणामः सम्यग्मिथ्यादृष्टिः आप्त
ादपदार्थेषुविपरीताभिनिवेशोमिथ्यादृष्टिः मसंज्ञिमनोबलेनशिक्षालापग्राही संज्ञी तद्विपरीता असंज्ञी तद्भयसंज्ञत्वरहिताश्च आत[illegible]
हिआहाराजीवाः समुद्घातकेवलिनश्च अयोगिनः सिद्धाश्च अनाहाराः शेषा आहारकाजीवाः एवंचतुर्दशमार्गणाव्याख्याताः [illegible] चतुर्द
शस्थिरगुणस्थानेश्च जीवाज्ञातव्याः तत्र [redacted] सपदार्थानामरुचयो मिथ्यादृष्टिः ॥१॥ सम्यक्त्वंपरित्यज्यमिथ्यात्वमप्राप्यंतरालेवर्तमानाः सासादनस
म्यग्दृष्टयः ॥२॥ सर्वेदेवावंदनीयानचनिंदनीयाः सम्यग्मिथ्यादृष्टयः ॥३॥ प्राणादिषुविरतास्तत्रश्रद्धोपमम असंयतासम्यग्दृष्टयः ॥४॥ त्रसवधविर
ताः स्थावरवधादिविरताः संयतासंयतसम्यग्दृष्टयः ॥५॥ व्यक्ताव्यक्तविकथाकषायेंद्रियनिद्राप्रणयप्रमादवशात्तस्मादावृत्तधारकाः प्रमत्तसंयताः
॥६॥ नष्टपाशप्रमादाव्रतशीलगुणान्विताध्याननिरयुक्ताः अप्रमत्तसंयताः ॥७॥ अतीतसमयस्थितपरिणामैःसर्वथा असदृशपरिणामभावाद्पूर्वपूर्व
मारूपरामदृश्यश्च अपूर्वकरणास्तेचोपशमकाःक्षपकाश्च ॥८॥ एकस्मिन्समयेसंस्थानादिभिर्विपरिणामैः परस्परंनाव्यावर्तंतेइत्यनिवृत्तय
स्तेचोपशमकाःक्षपकाश्च ॥९॥ कतकफलसंयोगात्प्रसन्नसप्रसादकंयद्वदकलुषंतस्मादनंतगुणहीनाः सूक्ष्मलोभेस्थिताः सूक्ष्मसांपरायास्तेचोप
शमकाःक्षपकाश्च ॥१०॥ कतकफलसंयोगाद्यस्थितपंकस्वच्छजलवदुपशांतात्ताशेषमोहाउपशांतकषायावीतरागछद्मस्थाइत्यर्थः तद्यथा तिज्ञान
वरणदर्शनावरणस्याभिलत्वात् ॥ १ स्फटिकमणिताजनस्थितनिर्मलजलवत् क्षपिताशेषमोहाविशुद्धपरिणामाः क्षीणकषायावीतरागछ
द्मस्थाः २ केवलज्ञानप्रकाशविध्वस्ताज्ञानांधकारास्तेकेवललब्धिसमन्विताद्रव्यमनोवाक्काययोगभासहायादर्शनज्ञानेयुगपज्ज्ञातकाः सयोगि
केवलिनः ३ लक्ष्यः दाणलाहसोमुवभोगवीरियसम्मत्त दंसणणाणचरित्तेहदेपवलीयसत्ता[illegible]वा चउरसीतिलक्खणसमाधियजयः

MEMORIAL

विरुद्धाश्च अधयोगाश्च वा अयोगिकेवलिनः एतानि चउद्दस गुणस्थानानि ते च जीवाः सकलकर्मक्षयात्सिद्धा भवंतीत्याह ॥ [illegible] ॥ णिक्क
म्मा अट्ठगुणा किंचूणा चरमदेहदो सिद्धा लोयग्गठिदा णिच्चा उप्पादवएहिं संजुत्ता ॥ ते पूर्वोक्ता जीवाः सिद्धा भवंति कथंभूताः संतः णिक्कम्मा २
ज्ञानावरणीयदर्शनावरणीयवेदनीयमोहनीयआयुर्नामगोत्रांतराया इत्यष्टकर्मरहिताः अट्ठगुणा सम्मत्तणाणदंसणवीरियसुहुमं तह
व अवगहणं अगुरुलहुमव्वाबाहं अट्ठगुणा होंति सिद्धाणं अत्रानंतानुबंधिक्रोधमानमायालोभमिथ्यात्वसम्म मिथ्यात्वसम्यक्त्वानां २
सप्तप्रकृतीनां क्षयात् क्षायिकं सम्यक्त्वं अशेषविशेषतः सकलपदार्थस्फुरणमित्यर्थः तस्माद्यदुत्पन्नाद्दर्शनज्ञानमूलभूताः परमानंद
स्वरूपसंवेदकात्मपरिणाम एव सम्यक्त्वं एतदेवानंतसुखमुक्तं युगपत्सकलपदार्थज्ञातृत्वं ज्ञानं युगपदशेषपदार्था
लोकनं दर्शनं अनंतानामनंतसुखादीनां समस्तानां गुणानां निरवधिकालमर्यादीकरणसामर्थ्यं तदपि न कदाचिदन्यथाभावो वीर्यं
केवलज्ञानीगम्यत्वं इंद्रियस्वरूपं परिवर्जनाशक्तिर्नान्यत्सूक्ष्मत्वं एकस्मिन्सिद्धस्वरूपे असंख्यातानां सिद्धानामेकत्रसमाव
स्थितानामवकाशो अवगाहनं नैव गुरुत्वं नैव लघुत्वमगुरुलघुकत्वं असंख्यातानां सिद्धानामेकत्रसमवस्थितानां परस्परं संघर्षणाभा
वोऽव्याबाधत्वं चेति एवमष्टगुणसमन्विताः किंचूणा चरमदेहदो चरमदेहतः किंचिदूनत्रिभागेन हीनाः लोयग्गठिदा लोकाग्रस्थिताः णिच्चा
नित्याः सर्वेषां कालेऽनंतकालेऽपि तेषां प्रच्युतिर्नास्ति तथा उप्पादवएहिं संजुत्ता उत्पादव्ययाभ्यां संयुक्ताः एतौ पौवोत्पादव्ययावबाधौ तेषु दृष्टा
प्रतिक्षणविनाशिनो अर्थं च सूक्ष्मद्रव्यादेर्लिंगाच्चावगच्छंति परस्परं असंबद्धाः तविनश्यंतिजलकल्लोलवज्जल इदानीं जीवद्रव्यं व्याख्यायाजी २
वद्रव्यस्य पंचप्रकारं स्वरूपमाह ॥ अजीवो पुण णेओ पुग्गलधम्मो अधम्म आयासो कालो पुग्गलमुत्तो रूवादिगुणो अमुत्ति सेसा दु
पुद्गलमूर्तिः रूपादिगुणाः शेषाः पुनरमूर्ताः अत्र व्याख्यानं पूर्वमेवास्ति तस्य पुद्गलस्य किं [illegible] पर्याया इत्याह [illegible] ६

वलनाद्रे

द्दोबंधसुहुमथूलोसंठाणभेदतमछाया उज्जोदादवसहिया पुग्गलदव्वस्स पज्जाया ॥ १६ ॥ पुग्गलदव्वस्स पज्जाया एते पुद्गलद्रव्य
स्य पर्यायाः के ते सद्दा आत्मनः परिस्पंदात् नानाप्रकाराणुसंघट्टनात् जायते घटव्यापारेण करस्वरकाष्ठपाषाणादिपरस्परसंघर्षणेन वा नि
ष्पद्यते शब्दः बंधो स्निग्धपरमाणुद्वयेन सह रूक्षपरमाणूनां चतुर्णां संश्लेषः एकेन स्निग्धेन सह त्रयाणां रूक्षाणां संश्लेषः स्निग्धपरमाणु
त्रयेण सह पंचानां रूक्षाणां संश्लेष इति बंधस्य लक्षणमेतत् सुहुमा परमाणुः सूक्ष्मः थूलो स्कंधत्वात्स्थूलः संठाण समचउरस्ससंस्थानं
न्यग्रोधपरिमंडलसंस्थानं स्वातिकसंस्थानं वामलूराकृतिरित्यर्थः वामनसंस्थानं हुंडकसंस्थानं चर्मकारदृतिप्रकृतिरित्यर्थः कुब्जकसंस्थ २
नमिति तम अंधकारः छाया वृक्षादिलवाः उज्जोदा ताराचंद्रमणिमाणिक्यादिलवाः आदव आतपाः सूर्यलवाः जीवपुद्गलयोर्धर्मास्ति उद्योताः
सहकारी भवतीत्याह ॥ गाथा ॥ गइपरियाण धम्मो पुग्गलजीवाण गमनसहयारी तोयं जह मच्छाणं अच्छंता णेव सो णेइ ॥ ॐ ॥ टीका ॥ गइसहयारी
गतिसहकारी भवति कोऽसौ धम्मो धर्मद्रव्यं केषां पुग्गलजीवानां कथंभूतानां गइपरिणयाण गतिकर्मोदयात् चतुर्गतिपरिणतानां अत्र २
ह यदि तस्य गतिसहकारित्वं तादृशी शक्तिरस्ति तदा स्थितिं कुर्वतां तेषां किं न नयति अत्रोच्यते णेव सो णेइ स धर्मस्तेषां गच्छतां ताव
जीवपुद्गलानां स्थितिं कुर्वतां न नयति अतो धर्मद्रव्यादुदासीनः अस्यैवार्थस्य समर्थनार्थमुपमानमाह तोयं जह मच्छाणं यथा तोयं पानीयं म
त्स्यानां सहकारित्वं भवति स्थितं मत्स्यान स्थितिं कुर्वतां न नयति एवं धर्मः पुद्गलजीवानामपि स्थितिकारित्वे धर्मो भवतीत्याह ॥ गाथा ॥ ठा
णजुदाण अधम्मो पुग्गलजीवाण ठाणसहयारी छाया जह पहियाणं गच्छंता णेव सो धरइ ॥ १८ ॥ ठाणसहयारी स्थितिसहकारी भवति कोऽसौ
अहम्मो अधर्मः केषां पुग्गलजीवाणं पुद्गलजीवानां कथंभूतानां ठाणजुदाण स्थितिकर्मोदयात् स्थितिं कुर्वतां अत्राह यदि तस्य स्थिति
कारित्वे तादृशी शक्तिरस्ति तदा गच्छतां किं न स्थितिं कारयति अत्रोच्यते गच्छंता णेव सो धरइ स अधर्मो गच्छतो नैव धारयति तान् जीव

पुद्गलानामगछतांस्थितिंकारयति नोधर्मद्रव्योदयात्‌ अस्यैवार्थस्यसमर्थनार्थमुपमानमाह छायाजहपहियाणं यथाछायापथिकानां
स्थितिसहकारित्वेभवती सती तान्पथिकान्गच्छतोपिनस्थितिंकारयति एवंधर्मः पुद्गलजीवानामपि ईदानींपंचानामपिद्रव्याणामवकाशदा-
नेआकाशद्रव्यंभवतीत्याह ॥गाथा॥ अवकाशदाणजोग्गंजीवाईणंवियाणआयासं जोण्हंलोगागासमलोगागासमिदिदुविहं
वियाण विजानीहिकंतत्किंतत्‌ आयासं आकाशंकथंभूतं अवगासदाणजोग्गंअवकाशदानयोग्यंकेषांजीवाईणं जीवादी-
नांपंचनामपितदाकाशं जोण्हं जैनमते दुविहं द्विःप्रकारंकथं लोगागासं अलोगागासमिदि लोकाकाशमलोकाकाशमिति तदा-
* काशद्वयं लोकालोकप्रकारेणद्विःप्रकारंभवतीत्याह ॥गाथा॥ धम्माधम्माकालोपुग्गलजीवायसंतिजावदिए आयासेसोलोगोतत्तोपरदोअ-
लोगुत्तो ॥२०॥टीका॥ सोलोगो सलोकोभवति सकः जावदिए आयासेसंति यावत्परिमाणेआकाशेसंतिष्ठंति केते धम्माधम्मीकालो धम्मा-
र्माकालाः नकेवलमिते पुग्गलजीवाय पुद्गलजीवाश्च तत्तोपरदोअलोगुत्तो तस्मात्परोअलोकउक्तः ईदानींकालस्वरूपमाह ॥गाथा॥ दव्व-
परियट्टरूवोजोसोकालोहवेइववहारो परिणामादिलक्खोवट्टणलक्खोडपरमट्ठो ॥२१॥टीका॥ पुद्गलकर्मादिद्रव्यस्यपरिवर्तनात्तत्तत्समयरूपा-
काथंभूताः मुख्यकालस्यपर्यायरूपाः क्षणध्वंसीभवव्यवहारकालः परिणामादीलक्खोभवव्यवहारकालःपरिणामेलक्ष्यते नवजीर्णरूपैःवट्टण-
लक्खोडपरमट्ठो द्रव्याणि वर्त्तयति स्वपरिणतिंनयतितदेवलक्षणंयस्यसवर्त्तनालक्षणः कुपुनः परमट्ठो परमार्थकालः अयंकुतोज्ञायतेकालः इ-
तिलोकवचनात्‌ सचनित्यः अन्यथाकथंद्रव्यवर्त्तकः तस्यनिश्चयकालस्यकिंस्वरूपमित्याह ॥गाथा॥ लोगागासपदेसेएक्केक्केजेठियाहुएक्केक्का
रयणाणंरासीमिवतेकालाणूअसंखदव्वाणि ॥२२॥टीका॥ तेकालाणूअसंखदव्वाणि तेकालाणवोऽसंख्यातद्रव्याणिजानीहि तेकेलोक-
यायस्थिताः हुस्फुटं कलोयायासपएसे लोकाकाशप्रदेशे कथंस्थिताः एक्केक्केएकैकस्मिन्आकाशप्रदेशेएकैकरूपेणस्थिताः ९

काकाशस्यपर्यन्तप्रदेशावधिंतःकालाणवोनिःक्रियाः एकैकाकाशप्रदेशेनएकैकवृत्त्यालोकंव्याप्यस्थितारूपादिगुणविरहिताअमूर्त्ताः कथंलोकं
व्याप्यस्थिताः रयणाणंरासीमिव यथारत्नानांराशयःसंघाता एकमेकंव्याप्यतिष्ठन्तितथातेतिष्ठन्ति एतानिषड्द्रव्याणिकालरहितानिपंचास्तिकाय- ३
भवंतीत्याह ॥गाथा॥ एवंछब्भेयमिदंजीवाजीवप्पभेददोदव्वं उत्तंकालविजुत्तंणादव्वापंचअत्थिकायाउ ॥२३॥टीका॥ एवंपूर्वोक्तप्रकारेण एवं प-
तिपादितंकिंतत्‌ दवं द्रव्यं इदंप्रत्यक्षीभूतंकतिभेदं छब्भेयं षड्भेदंकस्मात्जीवाजीवप्पभेददोजीवाजीवप्रभेदतःकालविजुत्तं एतद्वर्जि-
त्वकायाउ एतानिषड्द्रव्याणिकालरहितानिपंचास्तिकायाज्ञातव्याः कुपुनःएतेषांपंचानामस्तिकायत्वंकथंसिद्धमित्याह ॥गाथा॥ संतिजदो
तेणेदेअत्थित्तिभणंतिजिणवराजम्हा कायाइवबहुदेसातम्हाकायायअत्थिकायाय ॥२४॥टीका॥ संतिजदोतेणेदेतेपंचापि जदोयस्मात्का-
रणात्संतिविद्यंतेस्वस्वरूपेण तम्हा तस्मात्अत्थित्तिभणंतिजिणवरा तस्मात्कारणात्विद्यंतेइतिजिनवरावदंति अस्तित्वंसाधितं जम्हाबहु-
देसा यस्माद्बहुप्रदेशास्तेकस्त्वकायाइवशरीराणितत्रकायित्वंसाधितंतम्हाकायायतस्मात्कायाश्चेति एवंमिलित्वा अस्तिकाया-
श्च अस्तिकायाएतेपंच अत्रदृष्टांतः यथाकायशब्दःशरीरेव्युत्पादितः जीवादीनांकथंअत्रोच्यते तेषामुपचारात्‌आरोप्यते कथमुपचारः
यथाशरीरंपुद्गलद्रव्यंप्रचयात्मकं तथाजीवादिष्वपिप्रदेशप्रचयात्मकं तथाजीवादिष्वपिप्रदेशप्रचयाअपेक्षयाइवकायाइति कालस्य
कायत्वंकथमित्याह ॥गाथा॥ होंतिअसंखाजीवेधम्माधम्मेअणंतआयासे मुत्तेतिविहपदेसाकालस्सेगोणतेणसोकाओ ॥२५॥टीका॥ होंति
तिअसंखाजीवेधम्माधम्मेपदेसाभवंति असंख्यातप्रदेशाजीवधर्माधर्माणां अणंतआयासेअनंतप्रदेशाआकाशस्य मुत्तेतिविहपदेसा
मूर्त्तपुद्गलेत्रिविधाप्रदेशाःसंख्याताअनंताश्च कालस्सेगो कालस्यैकःप्रदेशःपरमाणुमात्रराशिवदवस्थितत्वात्‌ णतेणसोकाओ न
नकारणेनकालःकायसंज्ञोभवति अत्रपूर्वपक्षः ननुपुद्गलपरमाणुरप्येकप्रदेशीतस्यापिकायत्वानुपपत्तेःअस्यनिराकरणार्थ-

मो°

मिदमाह ॥गाथा॥ णयपदेसोवि अणूणाणाखंधप्पदेसदोहोदि बहुदेसोउवयारातेणयकायंभणंतिसवण्हू ॥टीका॥ णाणाखंधप्पदे
सदो णयपदेसोविअणुर्होदि बहुदेसोउवयाराः नानापुद्गलस्कंधरूपस्यैकप्रदेशोपि अणुर्बहुप्रदेशोपिभवति अतः उपचारात्यतस्तस्यपुद्गलस्य
परमाणोः पुनरपिस्कंधरूपत्वेपरिणतिरस्तिकालाणोः पुनःपरिणतिर्नास्तिस्कंधरूपत्वेनयतोरत्नानांराशिवच्चतेस्थितास्तस्मात् तेनायंका २
यत्वंभवति तेनकारणेनायंकायत्वंवदंतिपुद्गलपरमाणोस्तत्त्वज्ञाः इदानींप्रदेशलक्षणमाह ॥गाथा॥ जावदियंआयासंअविभागीपुग्ग
लाणुवट्टद्धं तंखुपदेसंजाणेतंखुस्फुटंप्रदेशंजानीहितंकं जावदियंआयासं यावत्प्रमाणमाकाशं किंविशिष्टं अविभागीपुद्गलाणुव
ट्टद्धं अविभागीकृतपुद्गलद्रव्यादानयोरप्यत्रपूर्वपक्षोनतुअविभागीकृतपुद्गलद्रव्येणयावदवष्टब्धमाकाशंतत्प्रदेशमुक्तं कथंनाव
प्रदेशस्सर्वपदार्थानामवगाहना अत्रोच्यते आकाशस्यार्थावगाहनालक्षणत्वात्तादृशीशक्तिरस्ति एकस्मिन्प्रदेशेजीवादीनांपंच
नामपिसमवायः सस्मातितंतथापितस्यतस्यपरिणामित्वं अयमत्रदृष्टांतः यथागुद्यानामनिधमध्ये एकवर्णलक्षेपिप्रविष्टेनाशस्यतन्मा
त्रः तथाकाशप्रदेशस्याप्यवगाहने तादृशीशक्तिरस्ति इदानींजीवानांपुद्गलसंबंधेसतिपरिणामविशेषसंबंधात्पदार्थानाह
आसववंधणसंवरणिज्जरमोक्खोसपुण्णपावाजेजीवाजीवविसेसातेविसमासेणपभणामि ॥टीका॥ तेविसमासेणपभणामि
तेपिसंक्षेपेणप्रभणामि तेके जेये आसववंधणसंवरणिज्जरमोक्खोसपुण्णपावा आश्रवबंधसंवरनिर्जरामोक्षाः सपुण्यपापाः कथंभू
ताः एते जीवाजीवविसेसा जीवपुद्गलयोर्विशेषाः यतोजीवस्यपुद्गलसंबंधादशुभपरिणामस्तस्मात्पापंपापादाश्रवस्तस्मात्कर्मबंधः
कर्मबंधस्तस्मात्[illegible]यसंवरानिर्जरासंवरनिर्जरायांपुण्यंपुण्याच्छुभपरिणतिः शुभपरिणतेःकर्मक्षयः कर्मक्षयान्मोक्षइति तत्रैषु
ताश्चतेकर्म[illegible]प्रकाररूपआश्रवः आत्मकर्मणोरन्योन्यप्रदेशानुप्रवेशात्मकोबंधः आश्रवनिरोधःसंवरः एकदेशकर्मसंक्षयलक्षण ८

निर्जरा सकलकर्मक्षयलक्षणोमोक्षः अशुभपरिणामलक्षणंपापं मिथ्यात्वप्रवर्तनलक्षणपापं इदानींआश्रवस्वरूपमाह ॥गाथा॥ आसवदिजेण १
णाकम्मंपरिणामेणप्पणोसविणेओ भावासवोजिणुत्तोदव्वासवणंपरोहोदि ॥टीका॥ सविणेओभावासवजिणुत्तो सज्ञेयोभावाश्रवो
जिनोक्तः कस्यसंबंधी अप्पणो आत्मनः सकः आसवदिजेणकम्मंपरिणामेण आश्रवतिकर्मयेनपरिणामेन दव्वासवणंपरोहोदि मनोवा
चाद्व्यापारश्रवणोहेतुर्भवति परिणामेनशुभाशुभरूपेणयदुपार्जितशुभाशुभाश्रवः सचज्ञानावरणादिरूपपरिणतस्तद्द्रव्याश्रवोनेक
र्थः एतयोर्द्वयोर्मध्ये भावाश्रवस्वरूपमाह ॥गाथा॥ मिच्छत्ताविरदिपमादजोगकोहादओथविण्णेयापणपणपणदसतियचउकमसोभेदादुपु ३५
व्वस्स ॥टीका॥ सविलेया सम्यक्प्रकारेणविज्ञेयाः कोतेभेदाःकस्य पुव्वस्स पूर्वस्यभावाश्रवस्येत्यर्थः किंनामानोभेदाः मिच्छत्तविर
पमादजोगकोहादयो मिथ्यात्वाविरतिप्रमादयोगक्रोधादयः अतः पणपणपणदसतियचउकसोभेदातेदाउ पंचपंचपंचदशत्रयश्चत्वारोभेदात्
दात् तत्रमिथ्यात्वंपंचप्रकारं सर्वक्षणिकमित्येकांतदर्शीबौद्धः सर्वंखल्विदंब्रह्मेत्येकांतदर्शीवेदः अद्वैतवादीविनयादेवमोक्षइ
त्येकांतदर्शीशैवः जिनस्यज्ञानंकुर्वतःसाक्षरणोमोक्षः स्त्रीनिर्वाणंचेत्येकांतदर्शीश्वेतपटः विकल्पसंकल्पकारकान् यथाज्ञाना २
त्मकोमोक्षस्तथाज्ञानादेवेतिमस्करिपूरणः श्रीपार्श्वनाथशिष्योप्येकांतदर्शी अविरतिपंचप्रकारं हिंसा असत्य चौर्य मैथुनसेवा प
रिग्रहस्वीकाररूपा प्रमादःपंचदशप्रकारः स्त्रीभक्तराजचोरकथाश्चत्वारः क्रोधमानमायालोभाश्चत्वारः इंद्रियप्रवृत्तयःपंच नि
द्रा स्नेह योगस्त्रिप्रकारः अशुभमनोवाक्कायरूपाः क्रोधश्चतुरप्रकारः सचप्रमादमध्येपतितोद्रष्टव्यः इदानींद्रव्याश्रवस्यद्वितीयस्वरू
पमाह ॥गाथा॥ णाणावरणादीणंजोग्गंजंपुग्गलंसमासवदि दव्वासवोसणेओअणेयभेदोजिणक्खादो दव्वासवसणेओसणेओश्च २
सज्ञेयः कतिभेदा अणेयभेद अनेकभेदःकेनकथितः जिणक्खादो जिनेनप्रतिपादित सकः जोग्गंजंपुग्गलंसमासवदि योग्यंयत्पुद्

लेसा आश्रवंति केषांयोग्यं णाणावरणादीणं ज्ञानावरणादीनां कर्म्मणामघानां अनेनात्वाश्रवोऽस्ति द्रव्याश्रवस्य हेतुः इदानीं भावबंधद्रव्यबंधयोः
स्वरूपमाह बज्झदि कम्मं जेण दु चेदणभावेण भावबंधो सो कम्मादपदेसाणं अण्णोण्णपवेसणं इदरो भावबंधो सो भाव
बंधो भवति स कः जेण दु चेदनभावेण येन पुनश्चेतन्यभावेन बज्झदि कम्मं बध्यते कर्म्म इदरो इतरो द्रव्यबंधः स कथं भूतः कम्मादपदेसाण
अण्णोण्णपवेसणं कर्म्मात्मप्रदेशानां परस्परप्रदेशप्रवेशः संबंधो चतुर्विधो भवतीत्याह पयडिट्ठिदिअणुभागप्पदेसभेदादु चदुविधो बं
धो जोगा पयडिपदेसा ठिदिअणुभागा कसायदो होंति चदुविधो बंधो चतुर्विधो बंधो भवति कस्मात् पयडिट्ठिदिअणुभाग
पदेसभेदादु प्रकृतिस्थित्यनुभागप्रदेशभेदात् कस्मात् कस्माद्बंध इति जोगप्पयडिपदेसा आत्मकृतमनोवचनकायेभ्यः प्रकृतिप्रदेशबंधो भव
तः ठिदिअणुभागा कसायदो होंति स्थित्यनुभागबंधौ कषायतो भवतः तत्र ज्ञानावरणादिकर्म्मप्रकृतीनां बंधः प्रकृतिबंधः मिथ्यात्वासंय
मकषाययोगवशात्कर्म्मत्वमुपगतानां ज्ञानावरणादिकर्म्मप्रदेशानां यावत्कालेनात्मस्वरूपेण परिणतियास्तिकालस्य स्थितिरिति सं
ज्ञाः तत्र ज्ञानावरणदर्शनावरणवेदनीयांतरायाणामुत्कृष्टा स्थितिः सागरोपमानां त्रिंशत्कोटीकोट्यः मोहनीयस्य सप्ततिकोटीकोट्यः नाम
गोत्रयोर्विंशतिकोटीकोट्यः आयुषस्त्रयस्त्रिंशत्सागरोपमाः जघन्यस्थितिर्वेदनीयस्य द्वादश मुहूर्त्ता नामगोत्रयोरष्टौ शेषाणामंतर्मुहू
र्त्ता तेषां स्थितिसंबंधः अनुभागः कर्म्मणां रसशक्तिर्वा अनुभागस्तस्य भागोऽनुभागबंधः प्रदेशता तु कर्म्माणुबंधाः कर्म्मप्रदेशा एकैकस्मि
न् जीवप्रदेशे अनंतानंतास्तिष्ठंति तेषां बंधः प्रदेशबंधः इदानीं संवरस्य भेदद्वयमाह चेदणपरिणामो जो कम्मस्सासवणिरोहणे हे
ऊ सो भावसंवरो खलु दव्वासवरोहणे अण्णो सो भावसंवरो खलु भावसंवरो भवति खलु स्फुटं स कः चेदणपरिणामो
जो यश्चेतन्यपरिणामः स्वस्वरूपपरिणतिः किंविशिष्टः कम्मस्सासवणिरोहणे हेऊ समागतः कर्म्मणः आश्रवनिरोधहेतुः मत

वचेतन्यपरिणामः दव्वासवरोहणे अण्णो द्रव्याश्रवरोधने अन्यो द्वितीयः तस्यैव निरोधने विशेषमाह वदसमिदीगुत्तीओ धम्माणुपे
हा परीसहजओ य चारित्तं बहुभेया णायव्वा भावसंवरविसेसा णायव्वा भावसंवरविसेसा द्रव्यसंवरविशेषाः ज्ञातव्याः कति
संख्योपेताः बहुभेया बहुभेदा इत्याह वदसमिदीगुत्तीओ धम्माणुपेहा परीसहजओ य चारित्तं च तपः समितिगुप्तिधर्म्मानुप्रेक्षाप
रीषहजयश्चारित्रं च तत्र तपो द्वादशप्रकारं बाह्याभ्यंतरभेदात् अनशनं अवमोदर्यं वृत्तिपरिसंख्यानं रसपरित्यागः विविक्तशय्यासन
कायक्लेशश्च बाह्यतपः षड्विधं प्रायश्चित्तं विनयवैयावृत्त्यं स्वाध्यायव्युत्सर्गो ध्यानं च अभ्यंतरतपः षड्विधं समितयः पंचप्रकाराः ईर्या भा
षा एषणा आदाननिक्षेपः व्युत्सर्गश्चेति गुप्तयस्त्रिप्रकाराः मनोवचनकायारूपाः धर्म्मो दशप्रकारः उत्तमक्षमामार्दवार्जवसत्यसं
यमतपस्त्यागाकिंचन्यब्रह्मचर्याणि धर्म्मः अनुप्रेक्षा द्वादशप्रकारा ज्ञातव्या अनित्य अशरण संसार एकत्व अन्यत्व अशुचित्व
आश्रव संवर निर्ज्जरा लोक बोधि दुर्लभ धर्म्मश्चेति परिषहजयो द्वाविंशतिप्रकाराः क्षुधा तृषा शीत उष्ण दंशमशका नाग्न्य
अरति स्त्री चर्या निषद्या शय्या आक्रोश वध याचना अलाभ रोग तृणस्पर्श मल सत्कारपुरस्कार प्रज्ञा अज्ञान दर्शनानि चारित्रं त्र
योदशप्रकारं हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिः पंचप्रकाराः समतास्तुतिवंदनाप्रतिक्रमणप्रत्याख्यानायप्रत्याख्यानानि षट् असही नि
सही इति चारित्रं सांप्रतं निर्ज्जराभेदद्वयमाह जह कालेण तवेण य भुत्तरसं कम्मपुग्गलं जेण भावेण सडदि णेया तस्सडणं चेदि णिज्ज
रा दुविहा जेण भावेण सडदि येन परिणामेन सटति गलति किं तत् कम्मपुग्गलं कर्म्मरूपं पुद्गलं कथंभूतं भुत्तरसं भुक्तरस
शक्तिर्यस्य तद्भुक्तरसं हीनं कृत्वा जहकालेण तवेण यथाकालेन सविपाकरूपेण तपसा च हठाद् अविपाकरूपेण इत्येवं द्विविधा नि
र्ज्जरा ज्ञातव्याः तस्सडणं चात्तत्कर्म्मणो गलनं च द्रव्यनिर्ज्जरा इति द्विप्रकारा ज्ञातव्या इदानीं मोक्षस्वरूपमाह सव्वस

भावमुक्तो स भावमोक्षो ज्ञातव्यः परिणाममोक्षः स कः जो अप्पणु हु परिणामो आत्मनश्चारित्रावरणीयक्षयात् [illegible] समुत्पद्यते
र्म्मजपरिणामः स भावमोक्षः इति दव्वविमुक्को य कम्मपुहभावो द्रव्यमोक्षस्य पुनः कर्म्मभावसकाशादात्मनः पृथग्भावः [illegible]
क्षत्तत्प्रकृत्यावस्थितिरित्यर्थः ईदानीं पुण्यपापस्वरूपमाह ॥गाथा॥ सुह असुहभावयुत्ता पुण्णं पावं हवंति खलु जीवा सादं सुहाउ
णामं गोदं पुण्णं पराणि पावं च ॥अथ टीका॥ पुण्णं पावं हवंति खलु जीवा पुण्यं पापं वा भवंति खलु स्फुटं कर्त्तृजीवाः कथंभूताः सु
ह असुहभावजुत्ता शुभाशुभपरिणामयुक्ताः शुभपरिणामात्पुण्यं अशुभात्पापमनुभवंति पुण्यस्य कानि चिह्नानीत्या
सादं सुह आउ णामं गोदं साता वेदनीयं शुभायुर्नाम गोत्रं एतैश्चतुर्भिः तं पुण्यं पापस्य कानि पराणि पावं च असाता अशुभायुर्नामगोत्रा
णि पापं च स्फुटं संप्रति पूर्वोक्तस्य मोक्षस्य कारणमाह ॥गाथा॥ सम्मद्दंसणणाणं चरणं मोक्खस्स कारणं हवदि ववहारा णिच्छयदो
तत्तियमइओ णिओ अप्पा ॥अथ टीका॥ हवदि भवति किं भवति कारणं हेतुः कस्य मोक्खस्स मोक्षस्य किं कारणं सम्मदंसणणाणं च
रणं च सम्यग्दर्शनज्ञानचारित्रं च कदा ववहारा व्यवहारनयापेक्षया णिच्छयदो तत्तियमइओ णिओ अप्पा निश्चयनयापेक्षया तत्त्रितया
त्मको निजात्मा दर्शनज्ञानचारित्रस्वरूपो यं देवरत्नत्रयं स एवात्मा तदेव रत्नत्रयमित्यर्थः अयमर्थं दृष्टयन्नाह ॥गाथा॥ रयणत्तयं ण
वट्टइ अप्पाणं मुयत्तु अण्णदवियम्मि तम्हा तत्तियमइउ होदि हु मोक्खस्स कारणं आदा ॥अथ टीका॥ तम्हा तत्तियमइउ होदि हु
मोक्खस्स कारणं आदा तस्मात्त्रितयात्मको दर्शनज्ञानचारित्ररूपो भवति हि स्फुटं मोक्षस्य हेतुरात्मा तस्मात्कस्मात् रयणत्तय
णं वट्टइ रत्नत्रयं न वर्त्तते क्व अण्णदवियम्मि अन्यस्मिन् शरीरादिद्रव्ये किं कृत्वा अप्पाणं मुयत्तु आत्मानं मुक्त्वा [illegible] आत्मन्येव
रत्नत्रयं वर्त्तते तद्रत्नत्रयस्य स्वरूपमाह ॥गाथा॥ जीवादीसद्दहणं सम्मत्तं रूवमप्पणो तं तु दुरभिणिवेसविमुक्कं णाणं

सम्मं खु होदि सदि जम्हि ॥अथ टीका॥ सम्मत्तं सम्यक्त्वं भवति किं तत् जीवादिसद्दहणं जीवादीनां श्रद्धानं रुचिः रूवमप्पणो तं तु तत्स्व
रूपं पुन आत्मनो रूपं नान्यस्य णाणं सम्मं खु होदि सदि जम्हि स्वपरपरिच्छेदकं ज्ञानं नियमेन भवति यस्मिन्सम्यक्त्वे सति किं विशिष्टं ज्ञा
नं दुरभिणिवेसविमुक्कं संशयविमोहविभ्रमविवर्जितं दर्शने सति यत् ज्ञानमुत्पद्यते तत् कथंभूतमित्याह ॥गाथा॥ संसयविमोह
विब्भमविवज्जियं अप्पपरसरूवस्स गहणं सम्मं णाणं सायारमणेयभेयं च ॥अथ टीका॥ सम्मं णाणं सम्यग्ज्ञानं भवति किं तत् गह
णं ग्रहणं कस्य अप्पपरसरूवस्स आत्मस्वरूपस्य परवस्तुनः स्वरूपस्य कथंभूतं तं गहणं संसयविमोहविब्भमविवज्जियं संशय
हरिहरादिज्ञानं प्रमाणं जैनं वा विमोहः अनध्यवसायो गच्छत्तृणस्पर्शपरिज्ञानं विभ्रमः शुक्तिकायां रजतादिज्ञानमिति तद्ग्रहणं किंविशि
ष्टं सायारमणेयभेयं च साकारं सविकल्पं अवग्रहेहावायधारणारूपकमनेकभेदं च मत्यादिभेदात् दर्शनज्ञानयोः को भेद इत्याह ॥गाथा॥ जं सा
मण्णं गहणं भावाणं णेय कट्टुमायारं अविसेसिऊण अट्ठे दंसणमिदि भण्णए समए ॥अथ टीका॥ दंसणमिदि भण्णए समए तद्दर्शनमिति [illegible]
भण्यते क समए जिनमते तत्किं जं सामण्णं गहणं यत्सामान्यग्रहः णेवक्कु सत्तावलोकनं करोति केषां भावाणं पदार्थानां किं कृत्वा अवि
सेसिऊण अट्ठे अविशेष्यार्थान् भेदमकृत्वा इदं शुक्लमिदं नीलमित्यादिपरिच्छित्ति अत्राह परः ननु दर्शनं तावत्स्वभावभावकं ज्ञानं च परा
र्थावभासकं भिन्नानां भावानां सामान्यग्रहणमिति दर्शनस्य कथं घटते यतस्तदवलोकने ज्ञानस्य पर्यायाज्जनं अत्र निराकरणार्थमिदमाह
णेय कट्टुमायारं यतो दर्शनं प्रथमसमये न वक्तुं शक्नोति तदस्मिन्वस्तुमिति ज्ञानं ज्ञानात्मकपुरुषस्य सुखदुःखाद्यवलोकनं च अतो द
र्शनं भण्यते किंचिदिस्य तस्य योजनं ज्ञानस्य न पुनः वस्तुसत्तावलोकनं तस्मात् स्वपरावभासकं दर्शनं किंतु निर्विकल्पं ज्ञानं पुनः स्वपरा
वभासकं सविकल्पं कथं यतो अवग्रहेहावायधारणा अर्थे समुत्पद्यंते इदानीं दर्शनपूर्वकं ज्ञानमाह ॥गाथा॥ दंसणपुव्वं णाणं छदमत्था

MEMORIAL

णाणदुण्णिउवउगा जुगवंजह्मा केवलिणाहे जुगवं तु ते दोवि दंसणपुव्वं णाणं दर्शनपूर्वकं ज्ञानं विषयविषयिणोः संनिपाते दर्शनं
नंतरमर्थग्रहणं किंचिदिति ज्ञानं यथा [illegible] छद्मस्थानां छद्मस्थानं किंचिद्दर्शनज्ञानावरणीययुक्तानां तेषां च णदुण्णिउवउगा जु
गवं ज्ञानोपयोगद्वयं युगपद्यस्मात्तस्मात्तेषां ततो दर्शनपूर्वकं ज्ञानं वीजांकुरवत् केवलिणाहे तु केवलज्ञानयुक्ते पुनः युगवं तु ते दोवि युग
पद्वौ स्वात्मप्रकाशप्रतापवत् इदानीं चारित्रमाह असुहादो विणिवित्ती सुहेपवित्तीय जाणचारित्तं वयसमदिगुत्तिरूवं ववहार
या दु जिणभणियं ज्ञानचारित्रं ज्ञानी द्विचारित्रं किं तत् असुहादो विणिवित्ती सुहेपवित्तीय अशुभात्पापास्रवद्वाररूपा
न्निवृत्तिः शुभरूपाश्रवद्वाररूपेण प्रवृत्तिश्च तत् वदसमिदिगुत्तिरूवं व्रतसमितिगुप्तिरूपं कस्मात् ववहारणय व्यवहारपक्षया[illegible]
विशिष्टं जिणभणिदं वीतरागप्रतिपादितं सा च चारित्रं पुनरहंतवीक्षापरिणामः इदानीं सम्यक्चारित्रमाह बहिरब्भंतरकिरियारोह
भवकारणप्पणासट्ठं णाणिस्सजं जिणुत्तं तं सम्मं परमचारित्तं तं सम्मं परमचारित्तं तत्सम्यक्परमचारित्रं भवति किंविशिष्टं जि
णुत्तं जिनैः प्रतिपादितं चारित्रं कस्य णाणिस्स योगिनो यथा स्यात् तमित्यर्थः तत्किं जं बहिरब्भंतरकिरियारोहो यद्बाह्याभ्यंतरक्रि[illegible]
धः तत्र बाह्यं वचनकायसंबंधाद्दयः आभ्यंतरे व्रतशीलवानित्यादयः किमर्थं क्रियारोधः भवकारणप्पणासट्ठं संसारोत्पत्तिविनाशार्थं
णिज्जियसासो णिप्फंदलोयणो मुक्कसयलवावारो जो एहावत्थगओ सो जोई णत्थि संदेहो इत्यर्थः इदानीं द्विविधमपि चारित्रं मा[illegible]
वतीत्याह दुविहंपि मोक्खहेउं झाणे पाउणदि जं मुणी णियमा तह्मा पयत्तचित्ता जूयं झाणं समब्भसह [illegible]
णात्रयं यन्मयेत् तम संतो यूयं ध्यानं समभ्यस्त तस्मात्कस्मात् जं यस्मात् पाउणदि प्राप्नोति को सो मुणी मुनिः कथं णिय[illegible]श्रयेनक
प्राप्नोति ध्याने ध्याने स्थित इत्यर्थः किं प्राप्नोति दुविहंपि द्विविधमपि चारित्रं कथंभूतं मोक्खहेउं मोक्षकारणमिति इदानीं [illegible]र्याः [illegible]

न्नयतीत्याह मा मुज्झह मा रज्जह मा दुस्सह इट्ठणिट्ठअट्ठेसु थिरमिच्छह जइ चित्तं विचित्तझाणप्पसिद्धीए [illegible] अहो शिष्याः थिरमिच्छ
ह जइ चित्तं विचित्तझाणप्पसिद्धीए स्थिरमिच्छत यदि चित्तं किमर्थं विचित्रध्यानप्रसिद्ध्यर्थं तदा मा मुज्झह मा मोहं गच्छत मा रज्जह मा रा[illegible] मा दु
स्सह मा द्वेषं कुरुत केषु विषये इट्ठणिट्ठअट्ठेसु इष्टानिष्टार्थेषु सांप्रतं जपध्यानयोः क्रममाह पणतीससोलछप्पणचदुदुग[illegible]
ह झाएह परमेट्ठिवाचयाणं अण्णं च गुरूवएसेण भो शिष्याः जपत ध्यायत पूजकानि अक्षराणि के[illegible]
परमेष्ठिवाचकानां केन प्रकारेणेत्याह पणतीस सोल छप्पण चदुदुगमेयं च पंचत्रिंशत् णमो अरहंताणं णमो सिद्धाणं णमो आयरियाणं [illegible]
उवज्झायाणं णमो लोए सव्वसाहूणं षोडश अरहंतसिद्धआयरियउवज्झायसाहू षट् अरहंतसिद्ध पंच असियाउसा चत्वारः अ[illegible]
ह्यं सिद्ध एकं ॐ अण्णं च गुरूवएसेण अन्यं च गुरूपदेशेन सिद्धचक्रोक्तादितं इदानीं कः कथंभूतो ध्येय इत्याह णट्ठचदुघाइकम्मो दंसण
सुहणाणवीरियमईओ सुहदेहत्थो अप्पा सुद्धो अरिहो विचिंतिज्जो विचिंतिज्जो विशेषेण चिंतनीयो भवंति भवतो हे शिष्याः को सौ अ
प्पा स्वात्मा कथंभूतः अरिहो अर्हत्स्वरूपः पुनः कथंभूतः सुद्धो शुद्धात्मस्वरूपो द्रव्यभावकर्मरहितः पुनरपि किंविशिष्टः सुहदेहत्थो सप्तधातु
रहितः पुनः किंविशिष्टः दंसणसुहणाणवीरियमईओ अनंतदर्शनसुखज्ञानवीर्यमयः समवसरणादिविभूतियुक्तो ह्यात्मा ध्येय इत्यर्थः इदानीं २
सिद्धो ध्येय इत्याह णट्ठट्ठकम्मदेहो लोयालोयस्स जाणओ दट्ठा पुरिसायारो अप्पा सिद्धो झाएह लोयसिहरत्थो झाएह [illegible]
त्यूयं को सो अप्पा आत्मा किंविशिष्टः णट्ठट्ठकम्मदेहो नष्टाष्टकर्मस्वरूपः इत्थंभूतः पुनः कथंभूतः लोयालोयस्स जाणओ दट्ठ लोकालोक[illegible]
कवर्तिसमस्तवस्तुज्ञायको दृष्टा च युगपत् कीदृगाकारो ध्येयः पुरिसायारो निर्गतसिक्थपुरुषप्रतिमानरवत् स्थितिस्वरूपः इदानीं आचार्यं ध्येय
इत्याह दंसणणाणपहाणे वीरियचारित्तवरतवायारे अप्पं परं च जुंजइ सो आयरिओ मुणी झेओ अप्पइ त्ति अ[illegible]

झेउ ध्यातव्यः कोसौ अप्पा आत्मा कथंभूतः किमिति भणित्वा सो आयरिउ मुणि स आचार्यो मुनिरहंसकः जो अप्पं परं च जुंजइ यः आ॰ आत्मानं परं च
संबंधं करोति क्व वीरियचारित्तवरतवायारे वीर्याचारित्राचारवरतपश्चरणाचारे किं विशिष्टे दंसणणाणपहाणे दर्शनज्ञानप्रधाने यत्र तस्मिन्
दर्शनज्ञानप्रधाने दर्शनपूर्वके पुसिद्धिरितिभावः इदानीं उपाध्यायो ध्येय इत्याह ||गाथा|| जो रयणत्तयजुत्तो णिच्चं धम्मोवएसणाणिरदो सो उज्झा
उ अप्पा जदिवरवसहो णमो तस्स ||पद्यटीका|| इमे इत्यध्याहार्यः सो उज्झाउ अप्पा स उपाध्यायः स्वात्मा ध्येयः किं विशिष्टः जदिवरवसहो
यतिवरवृषभः प्रधानः णमो तस्स नमस्कारोऽस्तु तस्मै सकः जो रयणत्तयजुत्तो यो रत्नत्रययुक्तः पुनः किं विशिष्टः णिच्चं धम्मोवएसणे णिरदो
नित्यं धर्मोपदेशाने निरतः साधु ध्येय इत्याह ||गाथा|| दंसणणाणसमग्गं मग्गं मोक्खस्स जो हु चारित्तं साहयदि णिच्चसुद्धं साहू स मुणी णमो तस्स
||पद्यटीका|| इमे अप्पा इत्यध्याहार्यः झेउ ध्यातव्यः कोसौ स्वात्मा किंस्वरूपो भणित्वा साहू स मुणी साधुः स मुनिरहं णमो तस्स नमस्कारो
स्तु तस्मै सकः जो हु साहयदि यः हु स्फुटं साधयसि किं चारित्तं चारित्रं कथंभूतं कृत्वं यथाख्यातं कदाचित् णिच्चं सर्वकालीनं पुनः कथंभूतं दं
सणणाणसमग्गं दर्शनज्ञानसंयुक्तं पुनरपि कथंभूतं मग्गं मार्गं कस्य मोक्खस्स मोक्षस्य शुद्धनिश्चयनयमाश्रित्य कीदृशं ध्यानमित्याह
||गाथा|| जं किंचिवि चिंतंतो णिरीहवित्ती हवे जदा साहू लद्धूणय एयत्तं तदा जातं तस्स णिच्छया झाणं ||पद्यटीका|| तदा जातं तस्स णिच्छया झा
णं तस्मिन् समये तदा ज स्फुटं तस्य सिद्धमसहायं तस्स तस्य साधोः णिच्छया झाणं शुद्धनिश्चयनयेन ध्यानं तदा कदा जदा साहू हवे यदा सा
धुर्भवेत् कथंभूतः णिरीहवित्ती वाद्याभ्यंतरपरिग्रहरहितः णिःक्रियमाणो णिःकं क्लोयणमुक्कसयलवावारो इत्यर्थः किं कुर्वन् जं किं
चिवि चिंततो य त्किंचिद्रव्यं रूपं वा पद्य रूपं वा वस्तु चिंतयन् ध्यायन् किं कृत्वा लद्धूणय एयत्तं लब्ध्वा एकत्वं आत्मनो इदानीं पर १२
ध्यानस्वरूपमुक्त्वा त्रिधा प्रकारेण ध्यानमाह ||गाथा|| मा चिट्ठह मा जंपह मा चिंतह किंचि जेण होइ थिरो अप्पा अप्पंमि रओ इणमेव परं हवे झा

णं ||पद्यटीका|| मा चिट्ठह मा जंपह मा चिंतह किंचि अन्यत् किंचिन्मा चेष्टत यूयं मा जल्पत मा चिंतयत तत्र हेतुः किं जे [illegible]
त्किंजल्पत त्किंचिंतयत जेन होइ थिरो अप्पा अप्पंमि रओ येन चेष्टित जल्पित चिंतितेन कृत्वा भवति स्थिरो भवतात्मा निरतः [illegible]
हूयात् तत्र अन्य बंतद्दिहत तत्परो भवेत् येनाविद्यामयं रूपं त्यक्त्वा विद्यामयं व्रजेत् ||गाथा|| किं इणमेव परं हवदि झाणं यस्मादेतदेव [illegible]
ध्यानं भवति महात्मनामिदं रत्नत्रयात्मकास्वभावा इत्याह ||गाथा|| तवसुदवदवं चेदा झाणरहधुरंधरो हवे जम्हा तम्हा तत्तियणिरदा त
ल्लद्धीए सदा होह ||पद्यटीका|| तम्हा तत्तियणिरदा तस्मात् त्रितयरता दर्शनज्ञानचारित्रस्वरूपताः किमर्थं तल्लद्धीए तस्य रत्नत्रयस्य ल
ब्धस्य अथवा तस्य परमपदस्य अर्थे सदा होह सर्वकालं भवत यूयं कस्मात् जम्हा यस्मात् चेदा झाणरहधुरंधरो हवे आत्मा ध्यानरथधु
रंधरो भवेत् कथंभूतात् तवसुदवदवं यः श्रुतव्रतवान् ग्रंथकारः कृत्य परिहारं कुर्वन्नाह ||इति श्री द्रव्यसंग्रहकर्त्ता नेमिचंद्राचार्येण तत्र
यतिभट्टारकप्रभाचंद्रटीकाकृतसंपूर्ण|| संवत् १६२२ का मिति चैत्रवदि ४ तिथौ दिनरविवारे वैराडदेशे श्रीचंद्रप्रभुचैत्यालये कारंजापुरग्रा
मे श्रीमूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे कुंदकुंदाचार्यान्वये तत्रबंशे भट्टारकप्रवरभट्टारकजिह्नी श्री श्री १०८ श्री श्री वि
जयकीर्त्तिजी भट्टारकजि श्री श्री श्री १०८ श्री श्री धर्मचंद्रजी तत् शिष्य पंडित वसंतरामेण स्वपाणिना इदं द्रव्यसंग्रहस्य ग्रंथटीका लिखितं
स्वात्माध्ययनार्थमिदं|| ||श्रीरस्तु|| ||कल्याणमस्तु|| ||स्वयंभूयात्|| ||श्री|| श्रीः श्रीः श्रीः श्रीः

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

II. 320

BHAU DAJI MEMORIAL